International Journal of Sanskrit Research 2019; 5(3): 115-116

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(3): 115-116
© 2019 IJSR
www.anantaajournal.com
Received: 04-03-2019
Accepted: 06-04-2019

**Dr. Debayan Banerjee**
Department of Sanskrit,
APC College, Kolkata,
West Bengal, India

**Correspondence**
**Dr. Debayan Banerjee**
Department of Sanskrit,
APC College, Kolkata,
West Bengal, India

# वाक्यपदीये स्फोटस्य स्वरूपम्

**Dr. Debayan Banerjee**

## प्रस्तावना

वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति । वस्तुतस्तु स्फोटेनैवार्थवोधो भवतीति, तेषां मतम् । स्फुटति प्रकाशते अर्थोऽस्मादिति स्फोट:, वाचक इत्यर्थ: । अथवा स्फुटति अभिवक्ती भवत्यर्थोऽस्मादिति स्फोटो नाम आद्यात्मक: शब्द: । स्फोटस्वीकारे युक्तिरपि वैयाकरणैरुक्ता । तथाहि एकस्मिन् पदे वर्णानां प्रत्येकमर्थस्य वाचकं न भवति । तथा सति द्वितीयादिवर्णानामुच्चारणमनर्थकं स्यात् । वर्णानां यौगपद्यमपि न सम्भवति, यतो वर्णानामुच्चारणमभिव्यक्तिर्वा क्रमेणैव भवति । येन क्रमेणानुभवस्तेनैव क्रमेण स्मरणे नियमो नास्ति । अतएव वर्णानां स्मरणेनापि यौगपद्यं न सम्भवति । एवं चार्थस्य वाचक: स्फोटो नादोऽभिव्यङ्ग्य: स्वीक्रियते ।

वाक्यपदीये भर्तृहरिणा स्फोटस्यालोचनं कृतम् । तेनोक्तम् – उपादानशब्देषु द्वौ शब्दौ भवत: । एक: शब्दानां निमित्तम्, अपरोऽर्थे प्रयुज्यत इति । नादरूपेण ध्वनिना स्फोटस्य सम्बन्धस्तेन विशेषत: प्रतिपादित: । स्फोटो नाम एको नित्योऽखण्डश्च । तथापि नादस्य क्रमिकत्वात् तत्रापि क्रम: प्रतीयते । तदुक्तम् –

> नादस्य क्रमजन्मत्वान्न पूर्वो न परश्च स: ।
> अक्रम: क्रमरूपेण भेदवानिव जायते ॥ इति ।

एवं च ध्वनिना स्फोटोऽभिव्यक्तो भवतीति गम्यते । निर्विभागोऽखण्ड: स्फोटात्मक: शब्दो यावद् बुद्धेर्विषयो न भवति, तावत् तेन कोऽपि व्यवहारो न सम्भवति ।
ननु स्फोटवादेऽपि आशङ्का भवति, ध्वनिना स्फोटस्याभिव्यक्ति: क्रमेण स्याद् युगप्द्वा? उभयपक्षेऽपि समान एव दोष इति । अस्य समाधानमुखेन भर्तृहरिणा उक्तम् –

> नादैराहितवीजायामन्त्येन ध्वनिना सह ।
> आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते ॥ इति ।

स्फोटविषये विविधानां मतानामुल्लेखोऽपि भर्तृहरिणा कृत: । केचिद् वदन्ति स्फोटेनाविभक्तरूपे ध्वनेर्ग्रहणं भवतीति । अन्ये पुन: वदन्ति इन्द्रियवद् ध्वनिरसंवेद्यरूपोऽपि शब्दग्रहे निमित्तं भवति । अपरे वदन्ति, सर्वदा ध्वने: स्फोटस्य च अभेदेन अनुभवो न भवति, कदाचिद् ध्वनेर्ग्रहणं भवति, स्फोटस्य तु नेति ।

ब्रह्मकाण्डे भर्तृहरिणा वाचकेषु उपादानशब्देषु शब्दद्वयं स्वीकृतम् । तत्र अभिन्नत्वेन प्रतीयमानमपि वस्तुत: शब्दद्वयं वर्त्तते । एक: शब्द: शब्दस्यापरश्चार्थवोधस्य कारणं भवति । प्रथमस्य ध्वनिरिति द्वितीयस्य च स्फोट इति संज्ञा । एवं च स्फोटार्थयो: सम्बन्धो वाच्यवाचकभाव:, ध्वनि-स्फोटयोश्च सम्बन्धो व्यङ्ग्य-व्यञ्जकभाव इति ।

ध्वनिना स्फोट: केन प्रकारेण व्यञ्जितो भवतीत्याचार्येण बहुधा दर्शितम् । तथाह्यत्र काचन आशङ्का भवति । एक एव ध्वनि: स्फोटस्याभिव्यक्तौ समर्थ इत्युक्ते द्वितीयादि ध्वनिनामुच्चारणमनर्थकं स्यात् । अन्त्य एव तथेति उक्ते सर्वेषामसामर्थ्यमविशेषात् । न ह्यन्ते वैलक्षण्यं किञ्चिदस्ति येन शक्यते वक्तुमनेनैवाभिव्यक्तिरिति । ध्वनीनां समुदायोऽपि न सम्भवति । ध्वनय: एकैकमुच्चार्य्यन्ते, प्रत्येकमुच्चरिता: प्रध्वस्ताश्च भवन्तीति न समावेश: । तस्मान्न ध्वनि: स्फोटस्याभिव्यञ्जक इति ।

अत्राचार्य्येण सदृष्टान्तं समाधानमुक्तम् । यथा कश्चन श्लोकोऽनुवाको वा आवृत्त्या समग्र एव स्फुटात् स्फुटतरो भवति, अन्तिमया चावृत्त्या दृढतम: संस्कारो जायते, तथैव ध्वनीनां प्रत्येकं क्रमेण स्फोटमकखण्डं प्रकाशयति, स्फोट: स्फुटात् स्फुटतरो भवति, अन्तिमेन च ध्वनिना पूर्णतया प्रकाशितो भवतीति । तदुक्तम्,

> नादैराहितवीजायामन्त्येन ध्वनिना सह ।
> आवृत्तपरिपाकायां बुद्धौ शब्दोऽवधार्यते ॥

**सहायकग्रन्थसूची**


1. वाक्यपदीय-ब्रह्मकाण्डम्, भर्तृहरि:, हरिवृषभकृतया स्वोपज्ञवृत्त्या संवलितम्। ड: शिवशङ्कर अवस्थी, चौखाम्बा ।
2. वाक्यपदीय-ब्रह्मकाण्डम्, भर्तृहरि:, विष्णुपद भट्टाचार्य्येण सम्पादितम्, पश्चिमवङ्ग राज्य पुस्तक पर्षद् ।